CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

महाभारतम् (१)

कुरुवंशे एको राजा शान्तनुः आसीत्। तस्य हस्तिनापुर-नाम राज्यम् आसीत्। तस्य द्वौ पौत्रौ आस्ताम् - धृतराष्ट्रः पाण्डुश्च। धृतराष्ट्रः जन्मान्धः आसीत्। एतस्मात् कारणात् पाण्डुः राजा भूतः। धृतराष्ट्रस्य शतं पुत्राः आसन्। ते कौरवाः कथ्यन्ते स्म। कौरवेषु दुर्योधनः ज्येष्ठः। पाण्डोः पञ्चपुत्राः आसन्। युधिष्ठिरः, अर्जुनः, भीमः सहदेवः नकुलश्च। इमे पाण्डवाः कथ्यन्ते स्म।

पाण्डोः मृत्योः पश्चात् धृतराष्ट्रः राजा भूतः। यतोहि तस्मिन् समये पाण्डवाः लघवः आसन्। कौरवाः पाण्डवाश्च शिक्षाभ्यासं गुरुद्रोणाचार्यस्य निर्देशने कृतवन्तः। सर्वे राजकुमारः युद्धकलायां निपुणाः जाताः।

पाण्डवेषु युधिष्ठिरः सदा सत्यम् एव वदति स्म। धर्मं पालयति स्म। भीमे शारीरिक-बलं सर्वाधिकम् आसीत्। स गदायुद्धेऽपि सर्वाधिकः तीव्रः आसीत्। अर्जुनः धनुर्विद्यायां निपुणः आसीत्। दुर्योधनोऽपि गदायुद्धे बहु वीरो आसीत्। पाण्डवाः बहुवीरा साहसिनश्च आसन्। पाण्डवानाम् अग्रजो युधिष्ठिरो युवराजो भूतः। अस्मात्

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कारणात् कौरवाः पाण्डवेभ्यो द्रुह्यन्ति स्म।

एकस्मिन् वारे दुर्योधनः पाण्डवान् वञ्चयित्वा निर्वासितवान्। किन्तु पाण्डवाः विदुरस्य संकेतेन केनापि प्रकारेण बहिर्निस्सरिताः।

यदा पाण्डवाः आहिंडन्ते स्म। तस्मिन् एव समये पांचालदेशस्य राजकुमार्याः द्रौपद्याः स्वयंवरो भूतः। स्वयंवरस्य समयः आसीत्—चक्रस्य उपरि भ्रमतो हि मत्स्यस्य छायां तैलस्य कटाहयां दृष्ट्वा तस्य नेत्रे बाणवेधः। बहुभिः राजभिः प्रयत्नैः कृतः। किन्तु सर्वे असफलाः जाताः। तस्मिन् एव समये पाण्डवाः तत्र प्राप्ताः। अर्जुनेन सम्यक् रूपेण लक्ष्यं कृत्वा बाणं क्षिप्त्वा वेधः कृतः। द्रौपदीं पाण्डवाः प्राप्तवन्तः। एतस्मात् कारणात् कौरवाः अपरम् ईर्ष्यालवो भूताः।

दुर्योधनस्य कथनेन धृतराष्ट्रेण कौरवेभ्यः हस्तिनापुर राज्यं दत्तम्। अपरञ्च युधिष्ठिराय भयंकरवने राज्यं दत्तम्।

पाण्डवैः इन्द्रप्रस्थनगरस्य स्थापना कृता। दुर्योधनः सदा पाण्डवान् पीडयितुम् एव प्रयासं कृतवान्। एकस्मिन् वारे दुर्योधनेन पाण्डवाः द्यूतक्रीडार्थम् आहूताः। खेले तेन

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

छलं कृत्वा पाण्डवानां पूर्णं राज्यं गृहीतम् । द्यूतक्रीडायाः समयानुसारेण पाण्डवैः त्रयोदशवर्षाणां कृते वनवासः प्राप्तः । पाण्डवाः वनं गताः । वनवास-समये पाण्डवैः बहु कष्टं प्राप्तम् । त्रयोदशवर्षाणि वनवासं पूरयित्वा प्रत्यावृत्ताः ते धृतराष्ट्रस्य पार्श्वे

श्रीकृष्णं दूतरूपेण प्रेषयित्वा कथितं यत् पञ्चग्रामा एव यदि मिलन्तु तर्हि वयं सन्तोषं करिष्यामः अन्यथा युद्धस्य कृते विवशा भविष्यामः । दुर्योधनः सूच्यग्रम् अपि भूमेः दातुं सन्नद्धो न भूतः ।

अतः युद्धस्य निश्चयः भूतः । युद्धे बहवो राजानः सम्मिलिताः । कौरवाः पाण्डवाः च सहायतार्थं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीकृष्णस्य पार्श्वे गतवन्तः। श्रीकृष्णेन कथितम् - एकं प्रति अहम् - अपरं प्रति मम सेना भविष्यति।

अर्जुनेन श्रीकृष्णः याचितः। दुर्योधनेन श्रीकृष्णस्य सेना याचिता। श्रीकृष्णः अर्जुनस्य सारथिः भूतः। कौरवाणां पाण्डवानां च सेना कुरुक्षेत्रे युद्धभूमौ सम्मुखीना भूता। कौरवाणां पाण्डवानांच गुरुः द्रोणाचार्योऽपि युद्धे भागं गृह्णाति स्म। युद्धे अर्जुनेन इदम् अनुभूतम् - युद्धे स्वसम्बन्धिनां गुरुजनानां च हत्या भविष्यति।

अर्जुनो बहु दुःखितो भूतः। श्रीकृष्णः अर्जुनं शिक्षितवान् - तस्य अयं विचारः मोहः अज्ञानं च।

श्रीकृष्णः शिक्षितवान् अस्मिन् समये युद्धम् एव कर्तव्यम् अस्ति। युद्धभूमौ कौरवाः पराजिताः।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

आगता होली !!

आगता होली नवीना, आगता होली!
हर्षिताः सर्वेऽपि लोकाः
विस्मृताः सर्वेऽपि शोकाः
बालका आनन्दमग्नाः
रङ्गखेले भृशं लग्नाः
नवैं रङ्गैं रञ्जिता रे
वीथिका रथ्या प्रतोली।
आगता होली।
उत्सवः सर्वत्र सृष्टः
नवरसः सर्वत्र वृष्टः
नूतनं वस्त्रं वसानैः
बालकैः हास्यं दधानैः
पूरिता मेवाकिलाटैः
खाद्यते सर्वत्र पोली [1]।
आगता होली।
भेदभावः समो गलितः
सर्वलोको मिथो मिलितः
श्रूयते सर्वत्र हूहः
अद्य मत्तो जनसमूहः
दीयते सर्वैः प्रसन्नैः
मस्तके सर्वस्य रोली।
आगता होली।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पृथ्वी - गाथा

वयं पृथिव्यां वसामः। तस्या विषये पुराकाले जना विविधाः कल्पनाः कृतवन्तः। प्राचीन-भारतीयाः कल्पितवन्तो यत् सा स्थालाकारा अस्ति, तां शेषनागः स्वफणासु धारयति।



पश्चिमदेशे ऽपि प्राचीना जनं कल्पितवन्तो यत् पृथ्वी छादाकारा। सा च द्वादशस्तम्भेषु तिष्ठति। तत्रैव केऽपि कथितवन्तो यत् एटलस् नामा दैत्यः तां स्वस्य स्कन्धयोः वहति।

सर्वप्रथमं एको भारतीयो विद्वान् आर्यभटः गणितवान् यत् पृथ्वी गोलाकारा। इत्थमेव पूर्वं सर्वे एव जना विश्वसितवन्तो यत् पृथ्वी स्थिरा, सूर्यादयः खेचरा गतिशीलाः। आर्यभट एव सर्वप्रथमं साधितवान् यत् पृथ्वी चलति। अधुना सर्वैः एव वैज्ञानिकैः स्वीक्रियते यत् पृथ्वी नारंगाकारा, सूर्यं परितः सा भ्रमति।

इदं कथ्यते यत् बहुपुराकाले एकः कोऽपि विशालः खेचरः सूर्यस्य निकटात् निस्सरितवान्। तस्याकर्षण-बलेन सूर्यस्य पिण्डात् अनेके अंशाः पृथग्भूताः। तेषु एव एका पृथ्वी। सूर्योऽधुनाऽपि अग्निपिण्डोऽस्ति। यदा पृथ्वी सूर्यात् पृथग्भूता तदा सा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अग्निपिंडरूपाऽऽसीत्। सा सूर्यं परितो भ्रमितुं प्रारेभे। इमे सर्वे सूर्यात् पृथग्भूता पिण्डाः ग्रहाः कथ्यन्ते। पृथ्वी अपि सूर्यस्यैको ग्रहः। स्वस्य अक्षे

पृथ्वी नृत्यति अपि, सूर्यं परितो भ्रमत्यपि। यथा लट्वा स्वस्य अक्षे नृत्यन्ती चलति तथैव। नर्तन काले पृथ्व्या यो भागः सूर्यस्य संमुखे भवति तत्र दिनं भवति अपरत्र रात्रिः। सा पृथ्वी एकस्मिन् अहोरात्रे पूर्णं नर्तनं कृत्वा पुनः पूर्वावस्थां प्राप्नोति। इत्थमेव एकस्मिन् वर्षे सूर्यस्य परिक्रमां पूरयति।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

यथा सूर्यात् पृथ्वी उत्पन्ना तथैव पृथिव्याः चन्द्र उत्पन्नः। स पृथिव्या उपग्रहः कथ्यते।



चन्द्र·

पृथ्वीवदेव अन्येषां ग्रहाणामपि चन्द्राः सन्ति। ग्रहोपग्रहाणां स्वकीयः प्रकाशो न भवति। सूर्य सदृशाः स्वयं प्रकाशाः स्वपिण्डाः भास्कराः कथ्यन्ते। अन्तरिक्षे अनेके भास्कराः सन्ति। तेषु केचित् अस्माकं सूर्यस्यापेक्षयाऽपि प्रकाशवत्तराः उष्णतराश्च। किन्तु अत्यन्तदूरस्थिता इति लघुतरा मन्दप्रकाशाः तारकारूपेण दृश्यन्ते। उपग्रहास्स्वं ग्रहं परिक्रमन्ते।

शनैः शनैः पृथ्वी श्यानीभूता। तदा कठोरशिलामय पटलेन आवृता। अस्मिन् पटले एव वसामः। तस्याः मध्यभागे अधुनाऽपि द्रवरूपेण शिथिलरूपेण वा पदार्थाः विद्यन्ते। यदा कदा भूपटलस्य स्खलनेन दारणेन वा अन्तस्तनाः पदार्थाः बहुवेगेन उपरि आगच्छन्ति पर्वताकारं च गृह्णन्ति। अयं ज्वालामुखः पर्वतः कथ्यते। श्यानीभावे पृथव्याः पटले वलयो जाताः। ताभिः वलिभिः क्वचित् पर्वताः क्वचिद्वा विशाला गर्ता उत्पन्नाः। गर्तेषु यदा

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

जलभरितं तदा समुद्राः भूताः। पृथ्वी-
तलस्य शते ७१ भागाः जलावृताः। पृथ्व्याः
गोलाकारा अनुकृतिः 'भूगोल' कथ्यते ->
भूविषयकं शास्त्रं तु
भूगोलं कथ्यते। खेचर-
ग्रहादीनां शास्त्रं खगोलं
कथ्यते। इदं ज्योतिषमपि
कथ्यते यतो हि खेचरा
ज्योतींषि इव दृश्यन्ते।
प्रयोगे ज्योतिषे ख-
गोलात् किंचिदपरं
फलित-भाग्यादि-
विषयोऽपि पाठ्यते।



भूपृष्ठस्य चित्राणि
मानचित्राणि कथ्यन्ते यतो हि तत्र सर्वं
मापानुसारं चित्रितं भवति। मानचित्राणां
संग्रहः भूपत्रा कथ्यते।

यस्मिन् अक्षे पृथ्वी चलति तस्य
एकोऽन्तः उत्तरध्रुवः, अपरश्च दक्षिण-
ध्रुवः कथ्यते। ध्रुवशब्दस्यार्थोऽस्ति
"स्थिरः"। नर्तने ध्रुवः स्थिर एव तिष्ठति।
उभयोः ध्रुवयोः मध्ये पृथ्वीतले स्थान-
संकेतनाय अनेकाः समान्तर रेखाः कल्प्यन्ते।
इमाः रेखाः कुत्राऽपि पृथ्व्यां न वर्तन्ते।
केवलं कल्प्यन्ते। स्पष्टमध्ये या रेखा
सा विषुव रेखा कथ्यते। विषुशब्दस्य
अर्थोऽस्ति समानौ द्वौ भागौ। एतेषां विषये
भूगोले अधिकं वर्णनं प्राप्यते।

मानचित्रे सदा उत्तरा दिग् उपरि
प्रदर्श्यते, दक्षिणा अधो भवति। वामहस्ते
पश्चिमा, हस्तदक्षिणे च पूर्वा।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सूर्यः सदा पूर्वस्यां दिशि उदीयमानः प्रतीयते यतो हि पृथ्वी पश्चिमतः पूर्वं प्रति नृत्यति। पूर्वा पश्चिमा उत्तरा दक्षिणा दिशः क्रमेण प्राची प्रतीची उदीची अवाची अपि कथ्यन्ते। यत्र सूर्यं प्राक् दृश्यते सा प्राची, यत्र पश्चात् प्राप्नोति सा पश्चिमा। उत्तरभागे हिमालयसत्वात् भारते सा दिग् उपरि मता, तस्मात् उदीची, उत्तराच्च दक्षिणा अधो मता तस्माद् अवाची। दक्षिण-शब्दः दिग्वाची दक्षिणा कथ्यते। हस्त-दक्षिणो दक्षिणः कथ्यते।

1- सूर्यः किं ग्रहः?
2- पृथ्वी कथमुत्पन्ना?
3- चन्द्रः किं ग्रहः?
4- चन्द्रः कं परिक्रमते?
5- चन्द्रस्य किं स्वयं प्रकाशोऽस्ति?
6- पृथु-शब्दस्य कोऽर्थः?
7- पृथ्व्याः अन्तः गर्भरूपेण ये पदार्थाः सन्ति, ते किं उष्णाः शीता वा?

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust.

भारतीयोत्सवाः

छात्रा भाषा संभाषणस्य शिक्षाग्रहणाय तत्पराः आसन् । अध्यापिका कुमारीचन्द्रा महोदया "भारतीयोत्सवाः" इतिनामकस्ये मनोरंजकस्य विचारस्य चयनं कृतवती । कुमारी चन्द्रामहोदया कक्षायाः छात्रान् उक्तवती :- अस्माकं देशे विभिन्न प्रकारकाः उत्सवाः सन्ति । विभिन्न सम्प्रदायानामभिन्नः तान् मानयन्ति । अग्रिमसप्ताहे कः उत्सवः भविष्यति ? मीना कूर्दन्ती आह :- गोकुलाष्टमी । अध्यापिका पृष्टवती- "किं त्वमस्या विषये मां किमपि वक्तुं शक्नोषि?।" गोकुलाष्टम्यां वयं भगवतः कृष्णस्य जन्मदिनं-समारोहं कुर्मः । गायन्तः नृत्यन्तश्च पुरुषा बालाश्च वीथीः संकुलाः कुर्वन्ति । नृत्यन्तश्च ते हस्तौ गृहीत्वा दीर्घाः पंक्तीः निर्मान्ति"। शोभा वदत् :- एकोऽपरस्य स्कन्धम्×आरुह्य एकं तुंग पर्वतं निर्मान्ति । अस्य मानवीय पर्वतस्य शीर्षे स्थितः जनः तत् भाण्डं त्रोटयति यत् वीथ्या उपरि उच्चस्थाने अवलम्बितं भवति ।"

अध्यापिका अपृच्छत् :- यदा ते भाण्डं त्रोटयन्ति तदा ते किं प्राप्नुवन्ति? कुसुमा उक्तवती :- सामान्यतया तन्मध्ये धनं मिलति यत् ते परस्परं विभज्य गृह्णन्ति । रजियां लक्ष्यीकृत्य अध्यापिका चन्द्रा पृष्टवती :- यवनानां महत्वपूर्णतमः उत्सवः कः अस्ति? रजिया अवदत् :- "रमजान ईदः"। अयं सर्वेषां यवनानां मासव्रतान्ते समापतति ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



इंदद्दिवसे जना: सहैव प्रार्थनायै समवेता भवन्ति। दिने जना: स्वमित्राणां सम्बन्धिनांच गृहाणि गच्छन्ति । परस्परं सौहार्दप्रदर्शनं च कुर्वन्ति । सन्तोष: उवाच:-वयं सिखा: महासन्तस्य गुरुनानकस्य जन्मदिनसमारोहस्य आयोजनं कुर्म: । पेसी : उवाच:-अस्माकं महत्त्वपूर्णोत्सव: पटेटी अस्ति । वयम्अग्निमन्दिरं गत्वा भगवत: प्रार्थनां कुर्म: । पटेटीनामोत्सवे सुन्दराणिनवीनानि वस्त्राणिप्राप्यन्ते । अस्माद्दिनारम्य पारसीकां नववर्ष: प्रारभते ।

कुमारी चन्द्रा आह:- दिसम्बरमासस्य पंचविंशतारिकायां क: कथयिष्यति । मेरी उवाच:- नि:सन्देहमयं क्रिसमसोत्सव: अस्ति।सम्मान्य ईश-क्राइस्टमहोदयस्य अत्र जन्मदिनम् । ईशुमतानुयायिन: इमम् उत्सवं समस्त-विश्वे मानयन्ति। वयं क्रिसमसवृक्षान् प्रीतिभोजस्थानानि च सौन्दर्येण सज्जामहे । यत्र बालेभ्य: उपहारं दातुं "सन्टाक्लाज" नामा आगच्छति इति स्मर्यते ।



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

राधा कथितवती :- मम प्रियोत्सवः दीपाली अस्ति । श्यामाऽपृच्छत् :- कथं नोतत् तत्र भारतेऽयमुत्सवः सर्वजनानां प्रियः अस्ति । कुमारी चन्द्रा उवाच :- इदं यथार्थमेवास्ति । अस्माकं सम्पूर्णदेशे हिन्दवः प्रकाशोत्सवं मानयन्ति । निर्धनतमस्य गृहेऽपि प्रज्वालिताः दीपपंक्तयः सज्जी क्रियन्ते । कुसुमा उच्चैः ध्वनिं कृतवती :- सायंकाले च विस्फोटानां विस्फोटं कृत्वा कियान् आनन्दः प्राप्यते । सर्वाधिकं स्फुलिंगवर्षिणाम् विस्फोटस्य दृश्यानां आनन्दं गृह्णामि । मीना अपृच्छत् :- दीपोत्सवस्य मिष्टानानि कथं विस्मरसि ? मम माता भगिन्यश्च बहुमिष्टान्नानि निर्मान्ति । वयं तानि मिष्टान्नानि स्वमित्रेभ्यः सम्बन्धिभ्यश्च प्रेषयामः । ते ऽपि अस्मभ्यं बहुमिष्टान्नानि प्रेषयन्ति । अहं पूर्णं दिनं मिष्टान्नं भक्षयामि । इदं श्रुत्वा सर्वे छात्राः हसितवन्तः । किंचित् विरम्य अध्यापिका उक्तवती :- दीपावलिः हिन्दुव्यापारिणां वणिजां च महत्वपूर्णं दिनमस्ति । यतो हि तेषां व्यापारिकवर्षस्य प्रारम्भः भवति ।

ऋतु सम्बन्धिनः ऐतिहासिकाः राष्ट्रीयोत्सवाः अपि सन्ति । किं कोऽपि कस्यापि ऋतूत्सवस्य विचारं कर्तुं शक्नोति ? मीना उवाच :- यत् वयं अपरेद्युः बसन्त-नृत्यं कलाभवने अपश्याम । सः ऋतूत्सवः आसीत् इति विचारयामि । अस्मिन् समारोहे बसन्तागमनस्य सूचना दीयते स्म । सरस्वती आह :- सत्यमिदम् यत् वसन्तः एतादृशः उत्सवः अस्ति । एवमेव होलिकाऽप्यस्ति । वस्तुतस्तु होलिकोत्सवः भारते लोकप्रियः आनन्ददायकः ऋतूत्सवः अस्ति । अस्याह्लादं सर्वे भारतीयाः गृह्णन्ति । दीना अपृच्छत् होलिकोत्सवे परस्परं रंगप्रयोगं कथं कुर्वन्ति?

कुमारी चन्द्रा स्पष्टं कृतवती :- ये जना रंगं क्षिपन्ति तत् प्रकृतेः देदीप्यमानस्वरूपस्य प्रतिनिधित्वं कुर्वन्ति । बसन्ते प्रकृतिः बहुरंगशोभां धारयति ।

पुनश्च अध्यापिका अपृच्छत् - अधुना किं वक्तुं प्रभवति यत् राष्ट्रीयाः ऐतिहासिक दिवसाः? लीला अवदत् - निःसन्देहम् "गान्धी जयन्ती" अक्टूबर- मासस्य द्वितीय-तारिकायां भवति । महाराष्ट्रनेतुः शिवाजी महाराजस्य जन्मदिवसः शिवाजयन्ती नाम अस्ति ।

नीलम उक्तवती - अतिमहत्वपूर्णौ राष्ट्रीयोत्सवः अगस्तमासस्य पंचदशतारिकायां स्वतन्त्रता दिवसः, जनवरी- मासस्य षड्विंशतारिकायां गणतन्त्रदिवसश्च ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कुमारी चन्द्रा आह - ~~अहो~~ सुष्ठु । वयं स्वदेशे सम्बध्यमानानाम् उत्सवानां विषये विचारितवन्तः । इमे उत्सवाः विभिन्नसमुदायानुयायिनः आनन्दयन्ति । वस्तुतो भारतदेश उत्सवानां देशइति वक्तुं शक्यते ।

अभ्यास प्रश्नाः

1- कथं जनाः गोकुलाष्टमीं मानयन्ति?

2- यवनानां प्रमुखतमः उत्सवः कः ~~अस्ति~~ ?

3- सिखानां किं प्रमुखं पर्व अस्ति ?

4- पारसीकेषु नव-वर्षारम्भः कदाभवति ?

5- दीपावलिः कथं प्रकाशपर्व अस्ति ?

6- हिन्दु-व्यापारिणां दीपावलिः प्रमुखोत्सवः कथमस्ति ?

7- बसन्तनृत्यम् कस्य प्रतीकं भवति ?

8- होलोत्सवे जनाः परस्परं कथं रंगेन रंजयन्ति ?

9- अस्माकं देशे कियन्तः राष्ट्रीयोत्सवाः सन्ति ?

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

एत बालिकाः

एत बालिकाः खेलत खेलम्
खेलः कुरुते सुखदं मेलम्
एहि संस्कृते एहि पुनीते
एहि मंजुले! एहि सुनीते।
आनय गेंदु दृढंचसहारं
वायुं भृत्वा कुरुत कठोरं
खेलांगनं चलत कृतगर्वाः
खेलत गेंदु मिलित्वा सर्वाः
विधिं पालयत खेलत शुद्धं
कुरुत न घर्षं नैव च युद्धं



इयं कीचिका मया धार्यते
अनया खेले विधिः कार्यते
जिह्म भवति यदि खेले किञ्चित्
चीकयामि शीघ्रं शित शित शित
गेंदुखेलनैः स्वस्थाः तुष्टाः
भवति बालिका हृष्टाःपुष्टाः
यत्रबालिकायशो विदधीते, सदा सदेशो जगति विजयते
एत बालिकाःखेलत खेलम्

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ग्रामे सुखम्

वसति सुखं ग्रामे नहि नगरे ।

आम्रवणे मधुमाससमुकुलिते
मुदितकोकिला 'कुहू' भरे ।
उन्मदगंधिनि युवयुगसन्धिनि
मन्थरपवनामोदकिरे ।
यो न गतो जानातु कथमसौ
भेदं वरटो वा भ्रमरे ।
वसति ... ...

ग्रीष्मनिर्मले सुखदशीतले
खेलाबहुले सरोवरे ।
नाभि- गभीरे चंचलनीरे
परिचिततीरे सुखाकरे ।
यो न स्नातो भाग्यविहीनो
ऽसौ वीरः स्वस्नानघरे ।
वसति ... —

वर्षति वारिणि युवमदकारिणि
वल्ली-सारिणि मुहुर्झरे ।
वलितवलीके रतरजनीके
मदनानीके धैर्यहरे ।
नैव पयोधरलीला स्वदिता
येन, न गणना तस्य नरे
वसति ... ...

शरदो हासे, कुसुमितकासे
कुमुदविकासे सुधाकरे ।
द्वारि खंजनं दधतमंजनं
कंजगंजनं हंसतरे ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

साक्षाद् दृष्टं नैव; लभ्यते

किं कर्णद-सुमनो-निकरे ।

वसति … …

वहति हैमने पवने; किरणैः

उत्पलतुहिने रंगधरे ।

ब्राह्ममुहूर्ते सूर्यस्फूर्ते

तेजसि-मूर्ते दिवाकरे ।

यो नो दृष्टा तस्य विनष्टा;

शक्तिर्देहे तमोभरे ।

वसति … …

उष्णं शुद्धं सद्यः सिद्धं

गुडं चत्वरे घृतं घरे ।

स्वर्ण आतपे चणक पादपे

प्रत्यग्रं शाकं शिशिरे ।

यो न भुक्तवान् वृथा लब्धवान्

तत् खादति शुष्कं नगरे ।

वसति … …

१- चैत्रो मासः कथं मधुमासः?

२- वरडः किं मुखेन दशति?
यद्वा अङ्गेन?

३- कासः कस्मिन् ऋतौ कुसुमते?

४- किं कर्णद-सुमनः?

५- प्रत्यग्रे चणकशाके कः
स्वादो भवति?

६- तत् नगरे शुष्कं कथं खाद्यते?

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

गर्जनराजः



गर्जनराजो नाम एकः वन्यो श्वः आसीत् । तम् एकः अमेरिकन-भारतीय 'सामारी' नामाजनः घासवने अग्रहीत् । हालमेरिली इमम् अश्वं प्राप्तुं निश्चयमकरोत् परं तस्य पिता धनाभावात् तं क्रेतुम असमर्थः आसीत् । तथापि हालः स्वकीयाम् आशां न अत्यजत् ।

एकस्मिन् दिने हालमेरिली स्वस्वप्नपशुं संनिरीक्षितुम् अगच्छत् । स सामारी गृहे प्राप्तवान् । सामारी अपृच्छत् त्वम् क्रेष्यसि ? हालः नकारात्मकं स्वशिरो दोलयन् उत्तारितवान् एषु महार्घदिनेषु पितुः धनप्राप्तिः अतीव कठिना । मुख्यतया यत् धनं त्वम् याचसे तत् कस्यापि बन्याश्वस्य कृते अत्याधिकं अस्ति । अहं भवन्तं कथयामि यत् त्वं माम् अश्वारोहणस्य आज्ञां देहि येन स मया परिचितः स्यात् । अहं तं स्वपशुशालां नेष्यामि । संभाव्यते तातः तुभ्यमपेक्षितं धनं दद्यात् । अमेरिकन भारतीयः संकुचितवान् । मद् ऋते कोऽपि अन्यः तमश्वम् अद्यावधि नैवारूढवान् । सोऽतीव भयावहः जीवः अस्ति।

तथापि प्रायः किञ्चित् कालानन्तरम् सः लघुघोटस्योपरि आरूढं बालकं तं बन्याश्वो बन्यनेत्राभ्याम् घोणया च तीव्रध्वनिम् कुर्वन्नासीत् । परंच शनै शनैः सः परिचितः अभवत् । हालः स्वघोटस्य रश्मिम् आकर्षितवान् स्नेहंच प्रदर्शयन् संस्पर्शम् अकरोत् । स तेन सह शान्तध्वनिना वार्तालापं करोति स्म । सद्यः एव बन्याश्वः हालं प्रति आकर्षितोऽभूत् ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

हालः स्वपुटकात् कंचित् स्वादिष्टं पदार्थं निष्कासयति स्म । तं स्व घोटाय अददात् ।

आकर्षकः सुगन्धः वन्याश्वस्य घोणां प्राप्तः । शीघ्रमेव सोऽपि किमपि चर्वयित्वा भक्षयितुमारब्धः । यं सह बालकहस्ताभ्याम् सलालसा अहरत् । हालः तस्य घोणां स्पृष्टवान् । सः पशुः नासिकया घुर्घुरायमाणः अपासरत् ।

शनैः परंच दृढतया बालकः स्वप्रयत्नं प्रारभत् । अन्ते गर्जनराजः स्वमस्तकस्य श्वेतनक्षत्रं स्पर्शयितुं हालं अनुमतिम् दत्तवान् । हाल : स्वमुखमधः कृतवान्वन्याश्वस्य नासिकायाम् स्वोच्छ्वासम् अक्षिपत् । एवं प्रथमे दिने बालकः गर्जनराजश्च अन्योन्यं किंचित् परिचितौ ।

अधुना बालकस्य स्पर्शेन सः वन्याश्वः पश्चात् नापासरत् । तत् पश्चात् हालः नित्यम् आगच्छति स्म । एकसप्ताहान्ते सामा इदम् दृष्ट्वा अतीवाश्चर्यान्वितोऽभूत् । स वन्याश्वः रश्मिं विनाऽपि हालमनु अश्वशालां गच्छति ।

बालकः अवोचत् - श्वः अहम् अस्योपरि आरोहणं करिष्यामि । इदं श्रुत्वा सामा आश्चर्यचकितोऽभूत् । सः विचारितवान् यत् हालः नित्यमेव अश्वोपरि अधिकाधिकमधिकारं प्राप्तुम् प्रयासं करोति । अपरस्मिन् दिवसे हालः तीव्रगत्या स्वघोटकस्य आसनात् वन्याश्वस्य रिक्तं पृष्ठम् प्राप्तवान् । एकेनभयावहेन घुर्घुरेण सह गर्जनराजः घासवने दीर्घम् उत्प्लुतवान् ।



CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अश्वपृष्ठः शिलातलमिव कठोरम् आसीत् । तदा सः स्वशिरः अधः कृतवान्
...त्येण च उत्प्लवन् अश्वारोहं पातयितुम् प्रयत्नमकरोत् । अधुनापि बालकः तस्य
...ष्ठोपरि अतिष्ठत् । चीत्कुर्वन् गर्जनराजः स्वभूमौ पतित्वा लुठितुम् आरब्धः ।
...श्वः स्फूर्तियुक्त आसीत् किन्तु बालकः तस्मादपि तीव्रतरः आसीत् । हालः स्वपादाभ्याम्
...त्थाय समीपमेव शान्तः स्थितः । गर्जनराजः परिलुठन् आसीत् यदा पशुः उत्प्लुत्यधावत्
हालः परितमुत्प्लुत्य स्वस्थानमगच्छत् । एकदा पुनश्च तौ भयजनके पलायने संलग्नौ ।

श्रेष्ठाश्वाः सरलतया दमयितुं न शक्यन्ते । बहुदिनानि यावत् बालकः अश्वश्च उभौ पूर्णश्रान्तौ अभवताम् । अधुना बालः तमश्वं गृहीत्वा न चलति स्म अपितु तम् स्वानुगमनाय परित्यजति स्म । पशुः तस्याह्वाने आगमनमशिक्षत । यतः हालः स्वतंत्रताप्रियः आसीत् अतः सः रश्मेः प्रयोगमपि अस्य पशोः कृते भारभूतम् अमन्यत । यतो हि सः अश्वः स्वतन्त्रवातावरणे वस्तुम् अभ्यस्तः आसीत् । युवा भूत्वा स बाल तेनाश्वेन बहुयात्रां कृतवान् ।

१- अमेरिकनभारतीयः के भवन्ति?
२- हालः अपरस्मिन् घोटके कथमारूढवान्?
३- लघुघोटमारूढो हालो गर्जनराजाय कथं स्नेहं प्रदर्शितवान्?
४- सर्वप्रथमं गर्जनराजः स्वशरीरे किमंगं स्प्रष्टुम् अददात्?
५- को रश्मिः?

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इन्द्रवज्रः

साम्प्रतम् इन्द्रः देवानां राजा मन्यते । सः मेघानां विद्युतः वृष्टेश्च स्वामी अस्ति । यदा अनावृष्टेः सस्यम् शुष्यति तदा कृषकाः आकारयन्ति - मेघराज ! जलं देहि भूमिः पिपासिता अस्ति । यदा वा अतिवृष्टिः संजायते नद्यः तटानुल्लंघ्य प्रवहन्ति क्षेत्राणि अन्न भाण्डाराणि जलप्लावितानि भवन्ति । तदापि व्याकुलाः जनाः कथयन्ति - हे राजन् इन्द्र ! अलम् वर्षया ।

सहस्त्रशः वर्षेभ्यः प्राक् एकदा ईदृक् अवसरः जातः यत् सृष्टे : समस्तजीवाः चीत्कारमकुर्वन् -"हे मेघराज ! अस्मान् त्रायस्व" तदानीम् पृथिव्याम् वृत्रासुरः नाम एकः अतीव भयंकरः राक्षसः आसीत् । तस्य महान् आतंकः प्रसरति स्म । कदाचित् स्वमायया अन्धकारं भूत्वा जगदाच्छादयति स्म । जनाश्च दिने अपि रात्रीव तमः दृष्ट्वा व्याकुला अभवन् । कदाचिद् सर्परूपं धारयित्वा जलप्रवाहं रुणद्धि स्म । नदानां जलप्रवाहावरोधेन न केवलं जना एव अपितु पक्षिणः अपि व्याकुला संजायन्ते स्म ।
न केवलं जनान् एव अपितु
~~तदैव नहि स~~ प्रतापयुक्तान् देवानपि पीडयति स्म । तस्य मायास्त्रेण कोऽपि तं हन्तुम् न प्रभवति स्म । सः सर्वत्रैव स्वमायां प्रसारितवान् । कदाचित् पृथ्वीनिवासिनः कदाचिद् आकाशस्थान् जीवान् अपि पीडयति स्म । तस्यात्याचारेण पीडिताः मनुष्याः देवेभ्यः प्रार्थितवन्तः । शीघ्र मेव अस्मान् त्रायस्व अन्यथा पृथ्वी श्मशान भूमिः भविष्यति । मानवजातिः जलं विना दुःखिता प्राणान् त्यजति ।

देवा वृत्रासुरं जेतुम् बहुयत्नमकुर्वन् । परं कोऽपि तस्य मायास्त्रं अवगन्तुम् समर्थः नाभवत् अन्ततः ते इन्द्रमुक्तवन्तः । - अस्माकं केवलं भवानेव इमं हन्तु क्षमः । इन्द्रोऽपि अन्यदेवैः सदृशः प्रजापतेः पुत्रः आसीत् । तस्य परिणयोऽपि पुलोमन्पुत्र्या शच्या सह जातः । सः मेघानां रथस्योपरि चलति स्म । वायुदेवः तस्याग्रदूतः आसीत् । सः स्वस्य एकस्मिन् हस्ते देदीप्यमानां विद्युतम् अपरस्मिन् वज्रं धारयति स्म । देवतानामाग्रहे सः वृत्रासुरं हन्तुं स्वीकृतवान् ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

य मुखाद् अग्निज्वाला: निर्गत्य दूरस्थान् वृक्षानपि दहन्ति स्म । ईदृशं भयंकरम्
यं दृष्ट्वा देवानामपि साहसं लुप्तम् । इन्द्रं त्यक्त्वा ते पालायिता: । केवलं मरुत: न्द्रस्य सहयोगं दत्तवन्त: । ते इन्द्रेण सह तस्य संमुखे स्थिता: । परं मायावि दैत्यस्य पराजय: कठिनमासीत् । स: प्रहारं कृत्वा पुनश्च गुहायां लीनोऽभवत् । अन्यच्च तेनावरुद्धेन जलेन बिना पृथिव्यां आकाशे च संकटस्थिति: संजाता ।

यदा बहुदिनानां भीषणयुद्धस्य अनन्तरमपि इन्द्र: वृत्रासुरं न पराजितवान् । तदा प्रजापति: इन्द्राय उक्तवान् - दधीचि: नाम एक: परमतपस्वी ऋषि: हस्ति । तस्य अस्थिभि: निर्मितेन वज्रेण तं वृत्रासुरं हन्तुं शक्ष्यसि ।

इन्द्र: इदं श्रुत्वा स्वयं महर्षे: दधीचे: आश्रमम् अगच्छत्, तं च स्वविवशताम् अश्रावयत् । ऋषि जगतो हिताय सहर्षम् स्वशरीरं त्यक्तुम् उद्यत: अभूत् । तस्य अस्थिभि: त्वष्टो वज्रस्य निर्माणमकरोत् । इमं वज्रं हस्ते गृहीत्वा इन्द्र: द्विगुणोत्साहेन वृत्रासुर सम्मुखम् अगच्छत् । तस्य मेघरथस्य गर्जनया वृत्रासुरस्य हृदयम् कम्पितम् । तमनुगच्छन्त: मरुत: तस्य इन्द्रस्य जयघोषं कुर्वन्ति स्म । सर्वप्रथमम् इन्द्र: स्ववज्रेण वृत्रासुरस्य मायां चिच्छेद तथापि स: दैत्य: अतिशक्तिशाली आसीत् । स्वमायां बिना स: बहुकालं युद्धम् करोत् । परम् अन्ते इन्द्र: स्ववज्रप्रहारेण वृत्रासुरस्य शिर: चिच्छेद । हते वृत्रासुरे रुद्धं जलमं प्रवाहितम् जातम् । तदा नद्यश्च जलेन पुन: पूर्णा जाता क्षेत्राणि सस्यश्यामलानि जातानि । पिपासिता पृथ्वी पुनश्च नवीनां चेतानां गृहीतवती । अत: अद्यापि जलसंकटे आपतिते, भवतु नाम जलस्य न्यूनता उतवा जलप्लावनम् वयं देवराजम् इन्द्रं स्मराम: ।

१- इन्द्र: कस्य पुत्र:।
२- वृत्र: कस्याकारं गृहीत्वा देवान् भीषयति स्म।
३- दधीचि: स्वानि अस्थीनि कथं दत्तवान्।
४- अस्थिभि: किं निर्मितम्?
५- इन्द्र: कथं जलवर्षणस्य देव: कथ्यते।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इन्द्रस्य नेतृत्वे देवेषु नवीनोत्साहः समुत्पन्नः । सः वृत्रासुरेण योद्धुमचलत् । परं यथैव स अतिभयजनकं दैत्याकारं सर्परूपम् गृहीत्वा फूत्कारं कुर्वन् सम्मुखमागतः तदैव देवदेवः अपि तमवलोक्य अनुपदम् अकरोत् । तस्य रक्तनेत्रे अंगारमिव ज्वलतः स्म ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इन्द्रस्य नेतृत्वे देवेषु नवीनोत्साहः समुत्पन्नः । सः वृत्रासुरेण योद्धुमचलत् *
रं यथैव स अतिभयजनकं दैत्याकारं सर्परूपम् गृहीत्वा फूत्कारं कुर्वन् सम्मुखमागतः तदैव
देवदेवः अपि तमवलोक्य अनुपदम् अकरोत् । तस्य रक्तनेत्रे अंगारमिव ज्वलतः स्म ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्वर्ण मच्छी

समुद्रस्य तटे एको बुड्ढो धीवरो वसति स्म । स मच्छान् झषित्वा जीवनं यापयति स्म । समुद्रस्य तटे एकस्याम् उच्च-शिलायां तस्य कुटीरम् आसीत् । स बुड्ढस्तु साधुः संतोषी चासीत् परं तस्य बुड्ढी अतिलोभिनी कोधना चासीत् । वराको बुड्ढो धीवरः आदिवसं झझावाते समुद्रस्य तटे मच्छान् झषित्वा यदा मच्छैः पूरितं कंडोलम् आदाय गृहं प्रत्यावर्तते स्म यदा बुड्ढी तस्य भारस्य अवतारणे जालस्य च शोषणे सहायताम् अकृत्वा तं कटूक्तीः श्रावयतिस्म - ओ हो ! आगतोऽसि ? आहिण्डस्व ! एकात्वहं या गृहे कार्यं कृत्वा-कृत्वा खिन्ना जाता, अन्यस्त्वमसि य आदिवसं समुद्रस्य तटे उपविष्टो वंशिकां वादयन् समयं यापितवान् । ओः दिवसं व्यतिपात्य एतावन्त एवं मच्छाः झषिताः त्वया ?

वराको बुड्ढः स्व-बुड्ढयाः भर्त्सनां सोढुम् अभ्यस्त आसीत् । सः तस्या दुर्वचनं श्रुत्वाप्यश्रुतं कृत्वा भोजनं कृत्वा स्वपिति स्म । एकदा प्रतिदिवसवत् समुद्रस्य तटम् आसाद्य चिरं प्रयासैः अपि कोऽपि मच्छो न झषितः । निराशः स जलेऽव-क्षिप्तं जालं यदा संहर्तुं प्रायतत, तदा जालं गुरुतरं प्रातीयत यद्यपि तस्मिन् मच्छः कोऽपि न दृश्यतेस्म । यदा निःशेषं जालमाकृष्य तद् अवामोचयत् तदा तत्र एका मनोहरा सुन्दरा स्वर्ण-मच्छी दृष्टा । बुड्ढो धीवरस्तां हस्ते उत्थाप्य तस्याः पृष्ठे हस्तेन परामृशत् । क्षणोत्तरं सा स्वर्ण मच्छी चेतनां प्राप्य अवदत् - आर्य! बुड्ढ, मां मुंच अहं समुद्रस्य राजकुमारी । यदि भवान् दयां कृत्वा मुंचति, अहं भवते यथायाचितं सर्वदा दास्यामि, भवतो निर्धनतां दूरी करिष्यामि ।

बुड्ढो धीवरः मच्छीं प्रति दयार्द्रो भूत्वा तां समुद्रेऽमुंचत् । स्वर्ण-मच्छी केलिं कुर्वन्ती स्वकीयं राजभवनं प्रतिगता । तत्र तस्याः सख्यः दास्यश्च उद्विग्नाः तस्याः मार्गं प्रतीक्षन्ते स्म । कुशलिन्यां राजकुमार्यां राजभवने पुनरागतायां सत्यां समारोहेण उत्सवो मानितः । सर्वाः सख्यः मिलित्वा गीतानि आगायन् !

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इतः सायं यदा बुड्ढो धीवरः रिक्तहस्तः घरम् आगतः तदा तस्या बुड्ढी तं बहु तर्जितवती । यदा सा क्रुद्धगीर्यं शान्ता जाता तदा बुड्ढः तां स्वर्ण-मच्छी-विषयिकां वार्ताम् श्रावयत् । एकस्मिन् भग्ने दारूनान्दे



सा वस्त्राणि प्रक्षालयन्ती उवाच - अहं तु तदैव कथयां विश्वासिष्यामि यदा त्वम् एकं नवं दारूनान्दं ततो याचयित्वा आनेष्यसि ।

अपरेद्युः बुड्ढः समुद्रस्य तटं गत्वा आकारयत् - अये स्वर्णमच्छि ! कुत्रासि त त्वम् कांचन ममापि प्रार्थनां श्रोतुम् अनुकम्पस्व । बुड्ढस्य कथनम् अनुक्षणेन एव सा दयालुः मच्छी तरंगान् आरुह्य हेलया त्वरितं तत्र आगता । तां दृष्ट्वा बुड्ढः त्रिवारं धरित्रीं स्पृष्ट्वा तस्यै अभ्यवदत् उक्तवान् च - अये राजकुमारि, मम बुड्ढी एकं दारूनान्दम् अभ्यर्थयते । -- " तस्या अभ्यर्थना फलवती भविष्यति" एवमुक्त्वा स्वर्ण-मच्छी पुनर्लोपं गता । घरम् आगत्य बुड्ढोऽपश्यत् यत् पुराणस्य

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नान्दस्य स्थाने शिंशपाकाष्ठ-निर्मित एकः शोभनो नान्दः राजते । बुड्ढः स्वर्ण-मच्छ्यै बारबारं धन्यवादान् समर्पयत् । परं सालोभिनी बुड्ढी तेन न संतुष्टा । सा उपालभमाना अवदत् - काष्ठस्य नान्दोऽपि किं दुर्लभं वस्तु यस्य कृते त्वं धन्यवादं समर्पयसि ? श्वः त्वं गत्वा तां वदेः यत् अस्फोटजस्य स्थाने वयम् एकं शोभनं घरम् इच्छामः ।

परेद्युः प्रातः एव सा बुड्ढं भोजन-पानम् अदत्त्वैव समुद्रस्य तटं प्रैषयत् । बराको बुड्ढो धीवरः तत्रगत्वा पुनः आकारयत्- अये समुद्रस्य राजकुमारि ! कुत्राऽसि त्वम् ? मम प्रार्थनां शृणु । समुद्रे लहर्यः उत्थिताः । तासु लहरीषु चिपलन्ती सा स्वर्णमच्छी अपि आगता । बुड्ढः ~~स्वर्णमच्छीं~~ त्रिवारं धरित्रीं स्पृष्ट्वा नमस्कृत्य अवदत् - "आर्ये मम स्वर्ण मच्छि ! अत्र मम बुड्ढी उटजे वसन्ती कष्टम् अनुभवति, सा एकम् इष्टका- घरम् अभ्यर्थयते ।"

- तस्या अभ्यर्थना फलवती भविष्यति - इत्युक्त्वा स्वर्ण मच्छी पुनः अन्तर्हिता । घरम् आगत्य बुड्ढोऽपश्यत् यत् जीर्णशीर्णस्य उटजस्य स्थाने तस्यैकः शोभनो घरो राजते । तस्मिन् भोजन-पानस्य निवासस्य च सर्वाणि सुख साधनानि सन्ति । अंगणे गौः बद्धा । घरस्योपान्ते कुक्कुट्यः अन्नकणान् चिन्वन्ति । चतुर्दिक्षु सस्यक्षेत्राणि लोभयन्ति । इदं सर्वं दृष्ट्वा बुड्ढः बुड्ढी-मवदत् - अद्धुना तु वयमेकेन समृद्ध कृषाणेन सदृशाः सुखं वसेम । बुड्ढस्य कतिपयानिदिनानि सुखं व्यतीतानि परं सा बुड्ढी स्ववर्तमानायाः दशायाः कदापि संतुष्टा न भूता । सा पश्चात्तप्यते स्म यत् तस्य बुड्ढेन घरस्य स्थाने कथंन एकं महद् हर्म्यं याचितम् साऽचिन्तयत् यत् सामान्य कृषाणीव अहं स्वकीयं सर्वं कार्यं स्वयं करोमि । क्षेत्रस्य पर्यवेक्षणम्, गौः सेवा घरकार्यं च । कृषाणेभ्यः रयीशो वरीयान् यस्य कश्चित् परिश्रमो न कार्यो भवति । अत एकस्मिन् दिने सा बुड्ढं पुनरवदत् - अहं श्रम - साध्येन जीवनेन अनेन विषण्णा जाता । अथाहमपि रयीशाणां स्त्रीणां वैभवमण्डितं जीवनं जीवितुमिच्छामि । अतस्त्वं गत्वा स्वर्ण मच्छी मर्थयस्व येन वयमपि हर्म्येण परिचर-परिचारिणीभिस्तथैव अन्याभिस्ताभिः ताभिः समृद्धिभिः सम्पन्ना भवेम ।

इदं श्रुत्वा वराको बुड्ढः पुनः समुद्रस्य तटम् आगच्छत्ससंकोचं च पुनरपि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

मुद्रस्य राजकुमारी मावतारयत् । अस्मिन् वारे समुद्रे अधिकमुच्चैः लहर्यः अस्थिताः ताश्च आस्थाय मच्छी आगता । बुड्ढः धरित्रीं त्रिवारं नत्वा अभ्यवादयत् उक्तवान् च - आर्ये मम दयालु राजकुमारि ! मम बुड्ढी अधुना रथीशानां समृद्धं जीवनं जीवितुम् अर्थयते । - "तस्याः अभ्यर्थना फलवती भविष्यति इत्युक्त्वा स्वर्णमच्छी पुनः लोपं गता। घरं प्रत्यागत्य बुड्ढोऽपश्यत् यत् तस्य साधारण घरस्य स्थाने एकं वैभवमण्डितं हर्म्यं राजते । तस्य कक्षाः सुसज्जाः संति । अष्टदशदासदास्यः तस्याः बुड्ढयाः सेवायाम् उपस्थिताः । काऽपि तस्याः केशान् सज्जयति काऽपि दर्पणमदाय तिष्ठति । संधारे स्थालिकासु विविधानि व्यंजनानि वर्तन्ते । मंजूषाः मुद्राभिराभूषणैश्च आपूरिताः वर्तन्ते । सर्वमिदं दृष्ट्वा बुड्ढः स्व मच्छ्यै वारंवारं धन्यवादान् अर्पयत् । परमेतावन्ति धन-धान्यानि प्राप्य बुड्ढयाः अहंकारः उच्चैः आकाशे आरूढः । श्वश्रूरिव बध्वानीते यौतके, सा मच्छी दत्तसामग्र्यां सदा आकृष्टवती- इदं वस्तु नास्ति, तन्नास्ति । मच्छी प्रयच्छन्ती वृद्धं प्रमादम भजत्। बुड्ढः मौनं बुड्ढयाः प्रजल्पम् अशृणोत् । सः किंचित् प्रत्याख्याय कलहं बधर्यितुं नैच्छत् ।

एकदा बुड्ढी बहिर् अटितुम् अभ्यलषत् । स आरथं सज्जीकृत्य आनेतुं तं साधुपतिमादिशत् । वराको बुड्ढः आरथं सज्जीकृत्य द्वारस्य सम्मुखे अस्थापयत् । बुड्ढी तत्र उपविश्य आरथं वाहितुमादिशत् । सः आरथं प्रैरयत् अनेकान् क्रोशान् अटित्वा यदा वृद्धा घरं प्रत्यागता तदा सा बुड्ढस्योपरि भृशमकुप्यत् । सा क्रुद्धा भूत्वा कथितवती - त्वं कीदृशो मूर्खोऽसि । इदं त्वं कथं न ज्ञातवान् यद् रथीशेभ्यो राजा श्रेयान् भवति । मया मार्गे स्वर्णेन महारथेन भ्रमन्ती राज्ञी दृष्टा । अहो कीदृशः सुन्दरः स रथः । तस्योपरि ध्वज आसीद् । परितः तिरस्करिण्य आसन् । अल्पोऽपि धूलिः तस्या उपरि न पतति स्म । तस्याः शिरसि मुकुटो, गोलैः विशालैः मुक्ताफलैः निर्मितो मुकुटो महार्घं बहु अरोचत । त्वया तु किमपि तत्र दृष्टमेव नहि । केवलं रथचालने एव त्वं संलग्नः । अहं सत्यं कथयामि - अश्वभाग्येन

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

 रोचते, यतो हि मार्गे धूलि: उड्डयते । पुनश्च यथा जना: राज्ञीं नत्वा नत्वा अभिवाद्- यन्ते तथा मां सभाजयितुं न प्रणमन्ति। ईदृशम् अपमानास्पदं जीवनं मह्यं न रोचते । त्वं श्व एव गत्वा स्वर्ण मच्छीं निवेदय यत् सा मां महाराणीं करोतु । अयं हारो व्यर्थ: । अहं मुकुटं धारयिष्यामि ।

वराको बुड्ढ: स्वबुड्ढया: हठात् उद्विग्नो जात: । स स्वर्ण मच्छीं विष ां कर्तुं नैच्छत् परम् अगमनादपि तस्य मुक्तिर्नासीत् । स जानाति स्म यत् वरमयाचित्वा स बुड्ढ्या घरे स्थातुं न शक्ष्यति । स: कार्याकार्यं स: सम्यगा- लोच्य पुनराकारयत् - "आर्ये मम स्वर्णमयि राजकुमारि, त्वं मम प्रार्थनां शृणु ।

अस्मिन् वारे समुद्रे बहूच्चै: लहर्य: उत्थिता:। अन्ते च एकाम् उच्च लहरीम् आरुह्य स्वर्णमयी मच्छी आगताऽपृच्छच्च - "अथाधुना तव बुड्ढी किमर्थयते " बुड्ढ: बिभ्यत् स्वकीयाया: लुब्धाया: बुड्ढया अभीष्टं कथितवान्।

" साधु! गच्छ बुड्ढया इदमप्यभीष्टं पूर्णं भविष्यति " इत्युक्त्वा स्वर्ण मच्छी पुनरन्तर्हिता ।

घरमागत्य बुड्ढोऽपश्यत् यत् हर्म्यस्य स्थाने एक: प्रासाद: शोभते ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

बुड्ढी महाराणी बुड्ढं झंझन्ती अवदत् - "त्वमस्मिन्नेव क्षणे समुद्र-तटं गच्छ स्वर्ण-मच्छीं चादिश यत् मम महाराणी समुद्रे शासनं कर्तुम् इच्छति। अपि च त्वमपि स्वकीयाभिः सखीभिः तस्याः सेवायाम् उपस्थिता भवेति । अहं महाराणी, त्वया गंतव्यमिति ममादेशः ।

वराको बुड्ढो दुःखितः खिन्नमनाः समुद्रस्य तटभागच्छत् । अत्रावसरे आकाशः मेघैराच्छन्नं आसीत्, विद्युतर्जतिस्म। बुड्ढो भीतभीतः सदैव स्वर्णमच्छीमाकारयत् समुद्रे महती वात्या उत्थिता । लहरीभिः समुद्रतले विक्षोभी जनितः मुशलधारा वृष्टिः आरब्धा । बुड्ढः अस्मिन् झंझावाले क्लिश्यमानः स्थितः आसीत । क्षणैः भयंकरं गर्जन मजायत अथ च काल लहरीः आरुह्य सा स्वर्ण मच्छी सम्प्राप्ता । सा शानेन शानसे अपृच्छत् - "वृद्धार्य ! महाराणीति पदमधिगत्यापि भवतः बुड्ढयाः कश्चिद परा अभिलाषोऽवशिष्टोऽस्ति सम्प्रति ?

बुड्ढः धरित्रीं प्रति त्रिवारं नत्वा अभिवादनं निवेद्य भयमनुभवन् स्वकीयायाः बुड्ढयाः अभिमान पूर्णम अभिलाषं विनेदितवान । तच्छ्रुत्वा समुद्रः रोषेण हुंकृतवान्निव ।लहर्यः गर्जितुं प्रारभंत स्वर्ण मच्छी च सिंहासनेन समं लोपं गता ।

किमप्युत्तर मनवाप्यैव बुड्ढो यदा तूष्णीं भूत्वा प्रासादंप्रत्यागतस्तदा सं तत्रत्यं परिवर्तनं दृष्ट्वा किं किमायिता उभवत् । न तत्र प्रासाद आसीत् न व दासीदासाः । तस्य स्थाने आसीत् स एवं पुराणोटजो भग्नो नान्दश्च, लोभिनी बुड्ढी उपविष्टा तस्मिन्नेव नान्दे वस्त्राणि फेनिलैः वस्त्राणि प्रक्षालयति स्म ।

१- धीवरः स्वर्णमच्छीं कथं मुक्तवान् ।
२- धीवरी पूर्वं किं याचितवती ।
३- रथीशः को भवति ?
४- अन्ते धीवरी कथं पुनः दरिद्रा भूता ।
५- अनया कथया का शिक्षा मिलति ।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

महात्मा बुद्धः

प्राचीनकाले भारतवर्षे कपिलवस्तु नामकम् एकं लघु राज्यम् आसीत्। तत्र शुद्धोदनः राजा आसीत्। तस्य द्वे राज्ञ्यौ आस्ताम्।

महामाया, गौतमी च। राज्ञ्या महामायया एकः पुत्रः उत्पादितः। बालकस्य नाम सिद्धार्थः भूतः। सिद्धार्थस्य जन्म लुम्बिन्याः वने वैशाखस्य पूर्णिमायां भूतम्। अस्य जन्मनः सप्तदिनानां पश्चात् अस्य अम्बा महामाया मृता। अस्य पालनं अस्य विमाता गौतमी कृतवती।

सिद्धार्थस्य जन्मनि केनापि तपस्विना कथितम् — यत् अयं बालकः वृद्धो भूत्वा प्रसिद्धः तपस्वी भविष्यति। अथ वा महाविजेता भविष्यति। अस्याः वार्तायाः कारणात् सिद्धार्थस्य पिता बहु चिन्तितो भूतः। सिद्धार्थस्य मनः संसारात् अपसरतु नहि, एतस्मात् कारणात् तेन बालकस्य कृते सर्वसुखाय त्रिषु ऋतुषु सुखं दातुं त्रीणि राजभवनानि निर्मितानि। राजकुमारस्य भ्रमणार्थं सुन्दराणि उद्यानानि निर्मितानि।

किन्तु सिद्धार्थस्य उपरि अस्याः व्यवस्थायाः कोऽपि प्रभावो न भूतः। स बहुधा स्वगृहात् दूरं एकस्य वृक्षस्य अधो ध्यानमग्नो भवति स्म।

सिद्धार्थः यदा भ्रमितुं गच्छति

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

स्म। तदा तेन सह तस्य सारथिः अपि गच्छति स्म। एकस्मिन् वार यदा स भ्रमितुं गतवान् तदा सिद्धार्थेन एकः बुद्धः दृष्टः। यस्य शिरः दोलति स्म। दन्ताः भग्नाः। अथ च दण्डस्य आश्रयं गृहीत्वा मन्दं मन्दं चलति स्म। सिद्धार्थः सारथिं पृष्टवान् – सारथे! इदं पुरुषस्य किं भूतम्। सारथिः उत्तरितवान् अयं पुरुषः बुद्धो भूतः। सिद्धार्थेन पुनः पृष्टम् — किम् अहमपि इत्थमेव बुद्धो भविष्यामि। सारथिः उत्तरितवान् — सर्वे मनुष्याः समयस्य आगमने बुद्धाः निर्बलाः च भवन्ति। तत्पश्चात् सिद्धार्थेन एकः रुग्णः मनुष्यः दृष्टः। पश्चात् दृष्टवान् चत्वारो जनाः स्वस्कन्धयोः एकं शवं नयन्ति स्म। सिद्धार्थः इमं दृश्यं दृष्ट्वा सारथिं पृष्टवान् – चत्वारो जनाः इमं पुरुषं स्कन्धयोः कथं नयन्ति स्म। सारथिः कथितवान् – अयं पुरुषः मृतः तस्मात् इमं ज्वालयितुं नयन्ति स्मः। सिद्धार्थस्य पृच्छने स कथितवान् — एकस्मिन् दिने सर्वे जनाः म्रियन्ते। सिद्धार्थः बहु दुःखितो भूतः। स्वमनसि विचारितवान् कथं सर्वे जनाः अस्मात् कष्टात् मुक्ताः भवन्तु।

सिद्धार्थस्य एतादृशीम् उदासतां दृष्ट्वा शुद्धोदनः बहु चिन्तितो भूतः। तेन सिद्धार्थस्य विवाहः एकया

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सुन्दर्या कन्यया सह कृतः। तस्या नाम यशोधरा आसीत् किन्तु सिद्धार्थस्य मुखस्य उदासता न गता। तस्माद् एकः पुत्रः जातः। तस्य जन्मनि सिद्धार्थेन कथितम् — इदम् अपरं बन्धनम्। पुत्रस्य नाम राहुल इति कृतम्।

एकस्मिन् दिने सिद्धार्थस्य मेलनं एकेन साधुना सह भूतम्। यस्य सिद्धार्थस्य उपरि बहु प्रभावः आगतः। तेन विचारितम् — तपस्या-माध्यमेन एव जनाः दुःखेभ्यः मुक्ताः भविष्यन्ति। अतः स गृहं त्यक्त्वा सन्यासी भवनस्य विचारं मनसि करोति स्म।

एकस्मिन् दिने अर्धरात्रौ राजभवनात् निस्सृत्य सारथिना सह वनं प्रति गतः। गमनस्य समये स विचारितवान् — पत्नीपुत्रभ्याम् कथयानि — किन्तु पुनः विचारितवान् — कुत्रचित् मोहः न आगच्छतु। तस्मात् न जागरितवान्। मौनं भूत्वा वनं प्रति गतः।

किञ्चित् दूरे स्व वस्त्राणि, आभूषणानि च अवतारितवान्। सारथये सर्वं दत्त्वा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कथितम् — अधुना त्वं गच्छ। अहं साधुरूपं धृत्वा ज्ञानस्य अन्वेषणाय निस्सरितः। सिद्धार्थेन बहु तपः कृतम्। किन्तु शान्तिः न मिलिता। तदा तेन विचारितम् — अधुना अहं स्वविधिना तपः करिष्यामि।

यदा सिद्धार्थेन स्वविधिना तपः करणस्य विचारः कृतः, तदा पञ्च तपस्विनः अपरे साधं भूताः। सर्वे तपस्विनः गयायाः पार्श्वे निरञ्जना नदी तटे प्राप्ताः। अनेकेन प्रकारेण शरीराय कष्टं दत्तवान्, भोजनं बहु अल्पं कृतवान्, तदा बहु दुर्बलो जातः, किन्तु अधुना यावत् तेन शान्तिः न मिलिता।

एकस्मिन् दिने स बहु ध्यानमग्नः आसीत्। तस्मिन् एव समये तस्य पार्श्वात् काश्चित् नर्तक्यः निस्सरिताः। तासाम् गानं श्रुत्वा तस्य मनसि आगतम् यत् कठिनेन तपसा मुक्तिः न भविष्यति।

तत्पश्चात् एका अपरा घटना जाता। एकस्य वृक्षस्य अधो सिद्धार्थः यदा ध्यानमग्नः आसीत् तदा एकस्मिन् दिने

एकस्य श्रेष्ठिनः पुत्री सुजाता वृक्ष-देवतायाः उपरि क्षीरान्नम् अर्पयितुम् आगता, सा सिद्धार्थम् आसीनं दृष्टवती। तदा क्षीरान्नं तस्य सम्मुखे एव स्थापितम्।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सिद्धार्थेन क्षीरान्नं बहु प्रेम्णा खादितम्।
इदं दृष्ट्वा ये अपरे तपस्विनः आसन्
ते सिद्धार्थं त्यक्त्वा गताः। तेन
ज्ञातम् - क्षीरान्नं-खादनेन सिद्धार्थस्य
तपः नष्टम्।

तत्पश्चात् सिद्धार्थः गयां
प्राप्तः। तेन तत्र पिप्पलस्य अधो
समाधिः गृहीतः। अयं निश्चयः कृतः
यदा ज्ञानं मिलिष्यति तदैव उत्थास्यामि
अष्टमे दिवसे तेन ज्ञानं प्राप्तम्।

तदैव सिद्धार्थस्य नाम
गौतमबुद्धो।
जातः।



१- सिद्धार्थस्य मातुः नाम किमासीत्?
२- शुद्धोदनः किं दृष्ट्वा चिन्तितः।
३- राहुलः कस्य नाम?
४- गृहत्यागसमये सिद्धार्थः पत्नीं कथं न जागरितवान्।
५- सिद्धार्थाय पायसं केन दत्तम्।
६- तपस्विनः सिद्धार्थं कथं त्यक्तवन्तः।

Kashi Maharani Collection, Ramnagar Fort, Varanasi